International Journal of Academic Research and Development
ISSN: 2455-4197, Impact Factor: RJIF 5.22
www.academicsjournal.com
Volume 2; Issue 4; July 2017; Page No. 843-845

# अद्वैतयते राघवोल्लासमहाकाव्यस्य महाकाव्यत्वम्

**मनीष कुमार त्रिपाठी**

शोध छात्र, राष्ट्रिय संस्कृत संस्थान, गङगानाथ झा परिसर, इलाहाबाद, उत्तर प्रदेश, भारत।

## प्रस्तावना

लोकोत्तरवर्णनानिपुणकविकर्म काव्यम्। तच्च काव्यं कविशब्दात् 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (अष्टाध्यायी 5/1/124) इति सूत्रेण कर्मणि ष्यञि कृते वृद्धौ टिलोपे च कृते सिद्धयति। एतादृशस्य काव्यस्य किं स्वरूपमिति जिज्ञासा समुत्पद्यते। तस्य लक्षणं किम् इति प्रश्ने संस्कृतालंकारिकाः काव्यलक्षणविषये अनेकानि मतानि उपस्थापयन्ति। केचन आलंकारिकाः काव्यस्य प्रयोजनं नीत्वा काव्यलक्षणं कृतवन्तः, केचन आलंकारिकाः केवलं शब्दस्य वैशिष्ट्यमंगीकृत्य काव्यलक्षणं प्रतिपादितवन्तः। एवमेव काव्यलक्षणविचारचर्चायां अनेकानि काव्यलक्षणानि दृष्टिपथमवतरन्ति। यथा–

- संक्षेपाद् वाक्यमिष्टार्थव्यवच्छिन्ना पदावली काव्यं स्फुरदलंकारं गुणवद् दोषवर्जितम्।–इति अग्निपुराणे
- शब्दार्थौ सहितौ काव्यम्–इति काव्यालंकारे भामहः।
- काव्यशब्दोऽयं गुणालंकारसंस्कृतयोः शब्दार्थयोः वर्तते–इति वामनः।
- शब्दार्थौ काव्यम्–इति रुद्रटः।
- शरीरं तावदिष्टार्थव्यविच्छन्ना पदावली–इति काव्यादर्शे दण्डी।
- अदोषौ सगुणौ सालंकारौ च काव्यम्–इति हेमचन्द्रः।
- तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि–इति काव्यप्रकाशे मम्मटः।
- वाक्यं रसात्मकं काव्यम्–इति साहित्यदर्पणे विश्वनाथः।
- रमणीयार्थप्रतिपादकः शब्दः काव्यम्–इति रसगंगाधरे जगन्नाथः।

इत्येवं विधानि विविधानि लक्षणानि दृष्टिपथम् आयान्ति। अनेन ज्ञायते यत् वैदिककाले किमपि वर्णनं काव्यमिति कथ्यते स्म। तदनन्तरं पुराणेषु कविकल्पितस्य मनोहरार्थस्य सौन्दर्ययुक्तं वर्णनं काव्यमिति मन्यते स्म, ततो रुद्रटकाले–'रमणीयशब्दार्थौ काव्यम्' इति मान्यता जाता। ततः परं साहित्यशिरोमणि ध्वनिप्रतिष्ठापकः आनन्दवर्धनाचार्यः रसे सौन्दर्यमवलोकितवान्। ततश्च तदनुयायी मम्मटः सौन्दर्यपूर्णं शब्दमर्थं च काव्यं भणति स्म। परन्तु विश्वनाथः पण्डितराजो जगन्नाथं च सौन्दर्यपूर्णार्थस्य वर्णनमेव काव्यमिति अमन्येताम्।

तच्चेदं काव्यं दृष्यश्रव्यभेदाद् द्विविधम्। द्विविधेऽस्मिन् काव्ये श्रव्यकाव्यस्यापि गद्यं पद्यं चम्पूकाव्यं चेति भेदेन भागत्रयं संजायते। तत्र पद्यकाव्यस्य महाकाव्यं खण्डकाव्यं मुक्तककाव्यं चेति रूपेण त्रयो भेदाः विद्वांसोऽङ्गीकुर्वन्ति। गद्यकाव्यस्य कथा आख्यायिका चेत्यूभौ भेदौ स्तः। दृष्यं काव्यं तु पुनः नाटक–प्रकरण–भाण–डिम–समवकार–ईहामृग–उत्सृष्टांक–व्यायोग–वीथी भेदभिन्नमभिनेयरूपम्।

पद्यकाव्यस्य प्रमुखभेदस्य महाकाव्यस्य प्राचीतमं लक्षणं भामहाचार्येण कृतं वर्तते–

सर्गबन्धो महाकाव्यं महतां च महच्च यत्।
अग्राम्यशब्दमर्थ्यं च सालंकारं सदाश्रयम्।।
मन्त्रदूतप्रयाणाजिनायकाभ्युदयैश्च यत्।
पंचभिः सन्धिभिर्युक्तं नातिव्याख्येयमृद्धिमत्।।
चतुर्वर्गाभिधानेऽपि भूयसार्थोपदेषकृत्।
युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक्।।............... ।[1]

भामहादनन्तरं काव्यादर्शग्रन्थे आचार्यदण्डिना महाकाव्यस्य लक्षणं निरूपितं यथा–

सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम्।
आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्।।
इतिहासकथोद्भूतमितरद्वा सदाश्रयम्।
चतुर्वर्गफलोपेतचतुरोदात्तनायकम्।।
नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः।
उद्यानसलिलक्रीडामधुपानरतोत्सवैः।।............ ।[2]

अग्निपुराणेऽपि महाकाव्यस्य लक्षणं स्पष्टतया उल्लिखितम्–

सर्गबन्धो महाकाव्यमारब्धं संस्कृतेन यत्।,
तादात्म्यमजहत्तत्र तत्समं नातिदुष्यति।।
इतिहासकथोद्भूतमितरद्वा सदाश्रयम्।
मन्त्रदूतप्रयाणाजिनियतं नातिविस्तरम्।।
शक्वर्याऽतिजगत्याऽतिषक्वर्या त्रिष्टुभा तथा।
पुष्पिताग्रादिभिर्वक्त्राभिर्जनैश्चारुभिः समैः।। .............. ।[3]

आलंकारिकः रुद्रटः स्वकीये काव्यलंकारग्रन्थे महाकाव्यस्य लक्षणं निरूपितवान्–

तत्र महान्तो येषु च वितते एवाभिधीयते चतुर्वर्गः।
सर्वे रसाः क्रियन्ते काव्यस्थानानि सर्वाण्ङ्गिं
तत्रोत्पाते पूर्वं सन्नगरीवर्णनं महाकाव्ये।
कुर्वीत तदनु तस्यां नायकवंषप्रषंसां च।।
तत्र त्रिवर्गसक्तं समिदृषक्तित्रयं च सर्वगुणम्।
रक्तसमस्तप्रकृतिं विजिगीषुं नायकं न्यस्येत्।।......... ।[4]

विष्वनाथाचार्योऽपि स्वकीय साहित्यदर्पणे–

सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।।
एकवंषभवा भूपाः कुलजा बहवोऽपि वा।
श्रृङ्गारवीरषान्तानामेकोऽङ्गी रस इष्यते।।
अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसंधयः।
इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम्।।.......... ।[5]

एषां पर्यालोचनेन ज्ञायते यत् प्राचीनभारतीयकाव्यषास्त्रदृषा महाकाव्यस्य संरचना सर्गबद्धाऽष्टादषसर्गतोऽन्यूना भवति। आहोष्वित् एकवंषभवाः सद्वंशोत्पन्नाः अनेके भूपालाः अपि नायकाः भवितुमर्हन्ति। अत्र श्रृंगार–वीर–शान्तादि–रसेषु एकोऽङ्गिरसः इष्यते। अन्ये सर्वेऽपि रसाः सर्वे नाटकसन्धयष्च अंगानि भवन्ति। एतस्य कथानकम् ऐतिहासिकं सज्जनाश्रितं भवति। अत्र तस्य चत्वारः वर्गाष्च तेषु एकं च महाकाव्यस्य मुख्यमुद्देष्यं भवेत्। एतस्य आदौ नमस्क्रिया आशीर्वादः वस्तुनिर्देशो वा मङ्गलाचरणे भवेत्। यतो हि मङ्गलं नमस्क्रिया आशीर्वादः वस्तुनिर्देषरूपेण त्रिविधम्। अतः तेष्वन्यतमस्य द्वयोः सर्वेषां वा मङ्गलाचरणे प्रयोगो भवेत्। अत्र क्वचित् दुष्टादीनां निन्दा, सज्जनानां गुणकीर्ति–प्रशंसा च भवेत्। प्रत्येकं सर्गे छन्दसां प्रयोगः इत्थं भवेत् यत् सर्गस्य प्रत्येकं श्लोकः एकेनैव छन्दसा भवतु किन्तु अन्तिमः श्लोकः अन्येन छन्दसा भवतु। एवम्भूतेऽपि कुत्रचित् सर्गे अनेकेषां छन्दसां प्रयोगो भवेत्। सर्गाः नातिस्वल्पाः नातिदीर्घाः सन्तः महाकाव्ये अष्टाधिकाः भवन्तु। सर्गान्ते आगामिसर्गस्य कथायाः सूचनमपि भवेत्। सन्ध्यायाः सूर्यस्य चन्द्रमसः, रजन्याः, प्रदोषस्य, ध्वान्तवासराणां, प्रातःकालस्य, मध्याह्नकालस्य, आखेटस्य शैलर्तवनसागराणां वर्णनं भवेत्। श्रृंगारे च सम्भोगविप्रलम्भयोः वर्णनं भवेत्। मुनीनां स्वर्गस्य नगराणां यागादीनामपि वर्णनमाष्यकम्। युद्धयात्रायाः विवाहस्य मन्त्राणां पुत्रोदयस्य यथायोग्यं साङ्गोपाङ्गं वर्णनम् आवश्यकम् इह भवेत्। कविः नायकस्य प्रतिनायकस्य वा नाम्ना महाकाव्यस्य नाम निर्धारयेत्। एवम्भूते महाकाव्यलक्षणे राघवोल्लासमहाकाव्यं कीदृशम् इत्येतत् साम्प्रतम् विचारणीयते–

पाण्डित्यप्रकर्षान्वितेन अद्वैतयतिना विरचिते राघवोल्लासे द्वादश सर्गाः 1621 श्लोकाष्च विराजन्ते। महाकाव्यस्यऽस्य नायको पुरुषोत्तमो रामः ईक्ष्वाकुवंशप्रसूतः धीरोदात्तगुणान्वितः नायिका च सीता उच्चकुलोत्पन्ना विद्येते। दैवादिविषयिणी रतिर्भावः प्रोक्तः इति सिद्धान्तस्य आलोके स्पष्टमिदं यत् महाकाव्येऽस्मिन् कविनिष्ठरामविषयरतिभावे अर्थात् श्रृङ्गारमेव प्रधानो रसः। अन्ये वीर–शान्त–करुण–वात्सल्यादयः अङ्गिरूपेण उपनिबद्धा5 वर्तन्ते राघवोल्लासमहाकाव्येऽस्मिन्।

निश्चप्रचं ग्रन्थस्यास्य सरसावर्णनपद्धतिः श्रृङ्गारप्रकर्षपूर्णकथा सहृदयहृदयान्यावर्जतः। महाकाव्येऽस्मिन् श्रृङ्गाररसस्य सम्भोगो विप्रलम्भष्चेति पक्षद्वयं समानरूपेण संषोभते। सीतया सह श्रीरामस्य रतिक्रीडायाः वर्णनं राघवोल्लासस्य दशमे सर्गे कियच्चारुतया करोति अद्वैतः–

किंचिद् भ्रमद्भ्रूतिलकं प्रियाक्षि! प्रेक्षस्व वक्षोजकलाविलासि।
उरः पुरः प्रेक्ष्य च जातषङ्का शङ्कातराक्षी तनुतेस्म मातुः।।
जानकीतनुररङिग कानने कामवाममृगया कृतकमे।
बालता हरिणषावकोऽकरोन्निर्गमाय यतनं तदोचितम्।।[6]

एवमेव महाकाव्येऽस्मिन् द्वितीये सर्गेऽपि श्रृङ्गाररसस्य वर्णनं सम्प्राप्यते सीतारामप्रणयप्रसङ्गे।

पौरजनविरहोक्तिकथनमिति नामके प्रथमे सर्गे वनगमनसम्बन्धिकारुणिकं वर्णनं अतीव हृदयावर्जकं वर्तते–

आज्ञां पितुः प्राप्य शनैः प्रयातः पथा धराधीषगतोचितेन।
तं वीक्ष्य पौरैः स्रवदस्रपूरैं र्हा! हा! रवो दुःखभरादकारि।।
त्यक्तः सुभषानिचयः कुतः स श्रीरामवस्त्राण्यपि होचितानि।
क्व यासि सीतासहितोऽभिषेके मुहूर्त्त एष प्रहितोऽन्यवेषः।।
माताजनानामियमद्य सीता पिताश्रिता शेषगुणस्त्वमेव।
बिनापराधं चरणे रतानां त्यागं कथं हा! कुरुतः शिषूनाम्?।।[7]

वात्सल्यरसस्योदाहरणं यथा–चतुर्थे सर्गे माता कौशल्या प्रातःकाले जागरणार्थं निवेदयति रामं प्रति–

उत्तिष्ठ दुष्टजनकष्टकरेष्टराम!
त्वद् बालभाषणसुधाप्रचुरप्रचाराः।
कुर्वन्तु तापमखिलं श्रवसोर्विदूरे
सूरेण सम्प्रति दिशां क्रियते प्रकाशः।।
उन्मीलनं कुरु दृशोर्बहुषो मदीया
त्वामर्थना विमलखेलनलालसेयम्।
त्वत्खेलनार्थमपि किंचिदपूर्वमेत–
दानीतमस्ति परिलोकय राम! वस्तु।।[8]

राघवोल्लासस्य अन्तिमे द्वादशे सर्गे स्वकीयाराधदेवं प्रति शान्तरससमन्वितं आत्मनिवेदनम्–

लोकानां मरणोत्सवो रघुपते! नित्यं मयालोक्यते
प्रीत्युत्फुल्लविचोचनाम्बुजयुगे नालं पुरे शाङ्करे।
एवं देवदयोदयेन पदयोः सन्तोऽप्यनन्तोत्सवं
यास्यन्त्यत्र पवित्रगात्रविलयं दृष्ट्वा मदीयं कदा?।।[9]

राघवोल्लासाख्यं प्रकृतमहाकाव्यं रामायणकथामाधारीकृत्य अद्वैतयतिना किंचित् परिवर्तनेन सह रचितम्। महाकविरयं ग्रन्थारम्भे विघ्नविघाताय श्रीगणपतेस्तदनु भगवत्याः वीणापाण्याः सरस्वत्याश्च नमस्कारात्मकं मङ्गलपद्यद्वयमुपस्थापयति–

सिन्दूरपूरारूणवारणस्यो दास्योद्यतानां सकलार्थदाता।
विघ्नाब्धिमज्जज्जनतावलम्बो लम्बोदरो मे हृदये सदास्तु।।
वीणा प्रवीणा सततं यदीया करद्वयी कान्तिमयी विभाति।
सा शुद्धवेषा कुमुदप्रकाषा भाषा ममाषा परिपूरणेस्तु ।।[10]

तदनन्तरं महाकविरयं मर्यादापुरुषोत्तमस्य श्रीरामचन्द्रस्य नमस्कारात्मकं यन्मङ्गलपद्यं प्रस्तौति तत्पद्य प्रतिसर्गस्य प्रारम्भे मङ्गलाचरणरूपेणोपन्यस्तं दृष्यते। तत्पद्यं यथा–

जयन्ति रघुनाथस्य पदपङ्कजपांसवः।
मूकोऽपि वावदूकोऽयमऽद्वैतो यदुपाश्रयात्।।

अद्वैतयतिना महाकाव्येऽस्मिन् विशेषतया शब्दालङ्काराणामेव प्रयोगः कृतः तेष्वपि प्रमुखतया अनुप्रासस्य सर्वे भेदाः प्रयुक्ताः। कुत्रचित् यमकालङ्कारस्य प्रयोगः अपि दृष्यते। अर्थालङ्काराणां प्रयोगः अपि दृष्यन्ते। अर्थालङ्कारेषु उपमा–रूपक–अर्थान्तरन्यास–उत्प्रेक्षा इत्याद्यलङ्काराणां समावेषः राघवोल्लासे सम्प्राप्यते।

एकस्मिन् सर्गे एकवृत्तमयैः पद्यैः निर्माणमपेक्षते लक्षणकारैः किन्तु अस्मिन् महाकाव्ये सर्वेषु सर्गेषु अनेकानि वृत्तानि सन्ति। महाकाव्यानां इमां परिस्थितिं दृष्ट्वैव विश्वनाथः कथयति यद् नानावृत्तिमयः क्वापि कष्चन् दृष्यते–

‘नानावृत्तमयः क्वापि सर्गः कष्चन दृष्यते’

कविना काव्येऽस्मिन् अनेकेषां छन्दसां प्रयोगः विभिन्नार्थप्रकाशनाय अतिमार्मिकतया कृतः। तानि यथा–इन्द्रवज्रा–उपजाति–अनुष्टुप–वसन्ततिलका–शार्दूलविक्रीडि

त–मालिनी–शिखरिणी च। महाकाव्यस्य पर्यालोचनेन ज्ञायते यत् अद्वैतयतेः प्रियं वृत्तम् उपजातिरेव वर्तते।
महाकाव्येऽस्मिन् सर्गान्ते भाविसर्गस्य कथासूचनापि दीयते। यथा– षष्ठे सर्गे सुबाहुमारीचयोः वधनिरूपणानन्तरं जनकेन प्रेषितस्य आह्वानपत्रस्य तथा च अहल्यायाः चर्चा सम्प्राप्यते।
सन्ध्यावर्णनं, सूर्यवर्णनं, चन्द्रवर्णनं, प्रदोषवर्णनं, रात्रिवर्णनं, प्रातःवर्णनं, शैलवर्णनं, ऋतुवर्णनं, वनवर्णनं, सागरवर्णनमपि सम्प्राप्यते।
एवंविध पर्यालोचनेन राघवोल्लासमहाकाव्यस्य महाकाव्यत्वं सिद्धम्।

**सन्दर्भ सूची**


1. काव्यालङ्कारः परि. 2/19.22, बिहार राष्ट्रभाषा परिषद्, पटना।
2. काव्यादर्षः, पृष्ठ 19–24, चौखम्बा कृष्णदास अकादमी, वाराणसी, 2005
3. अग्निपुराणम्, अध्यायः 337/24–34 काव्यादिलक्षणम्
4. काव्यालंकारः, 16/2 प्रकाशकः पाण्डुरङ्ग जावजी बम्बई
5. साहित्यदर्पणः, षष्ठपरिच्छेदः, 315–327
6. राघवोल्लासमहाकाव्यम्, 10/36,37 प्रकाशकः–गङ्गानाथझा परिसरः, प्रयागः, 2011
7. तदेव 1/63–65
8. तदेव 4/49,55
9. तदेव 12/130
10. तदेव 1/1,2